# Shri Raghava Stotram

# શ્રીરાઘવસ્તોત્રમ્

## Document Information

Text title : Shri Raghava Stotram

File name : rAghavastotram.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 12, 2020

*sanskritdocuments.org*

# શ્રીરાઘવસ્તોત્રમ્

ઇન્દ્રનીલાચલશ્યામમિન્દીવરદૃગુજ્જ્વલમ્ ।
ઇન્દ્રાદિદૈવતૈઃ સેવ્યમીડે રાઘવનન્દનમ્ ॥ ૧॥

પાલિતાખિલદેવૌઘં પદ્મગર્ભં સનાતનમ્ ।
પીનવક્ષઃસ્થલં વન્દે પૂર્ણં રાઘવનન્દનમ્ ॥ ૨॥

દશગ્રીવરિપું ભદ્રં દાવતુલ્યં સુરદ્વિષામ્ ।
દણ્ડકામુનિમુખ્યાનાં દત્તાભયમુપાસ્મહે ॥ ૩॥

કસ્તૂરીતિલકાભાસં કર્પૂરનિકરાકૃતિમ્ ।
કાતરીકૃતદૈત્યૌઘં કલયે રઘુનન્દનમ્ ॥ ૪॥

ખરદૂષણહન્તારં ખરવીર્યભુજોજ્જ્વલમ્ ।
ખરકોદણ્ડહસ્તં ચ ખસ્વરૂપમુપાસ્મહે ॥ ૫॥

ગજવિક્રાન્તગમનં ગજાર્તિહરતેજસમ્ ।
ગમ્ભીરસત્ત્વમૈક્ષ્વાકં ગચ્છામિ શરણં સદા ॥ ૬॥

ઘનરાજિલસદ્દેહં ઘનપીતામ્બરોજ્જ્વલમ્ ।
ઘૂત્કારદ્રુતરક્ષૌઘં પ્રપદ્યે રઘુનન્દનમ્ ॥ ૭॥

ચલપીતામ્બરાભાસં ચલત્કિઙ્કિણિભૂષિતમ્ ।
ચન્દ્રબિમ્બમુખં વન્દે ચતુરં રઘુનન્દનમ્ ॥ ૮॥

સુસ્મિતાઞ્ચિતવક્ત્રાબ્જં સુનૂપુરપદદ્વયમ્ ।
સુદીર્ઘબાહુયુગલં સુનાભિં રાઘવં ભજે ॥ ૯॥

હસિતાઞ્ચિતનેત્રાબ્જં હતાખિલસુરદ્વિષમ્ ।
હરિં રવિકુલોદ્ભૂતં હાટકાલઙ્કૃતં ભજે ॥ ૧૦॥

રવિકોટિનિભં શાન્તં રાઘવાણામલઙ્કૃતિમ્ ।
રક્ષોગણયુગાન્તાગ્નિં રામચન્દ્રમુપાસ્મહે ॥ ૧૧॥

લક્ષ્મીસમાશ્રિતોરસ્કં લાવણ્યમધુરાકૃતિમ્ ।
લસદિન્દીવરશ્યામં લક્ષ્મણાગ્રજમાશ્રયે ॥ ૧૨॥

વાલિપ્રમથનાકારં વાલિસૂનુસહાયિનમ્ ।
વરપીતામ્બરાભાસં વન્દે રાઘવભૂષણમ્ ॥ ૧૩॥

શમિતાખિલપાપૌઘં શાન્ત્યાદિગુણવારિધિમ્ ।
શતપત્રદૃશં વન્દે શુભં દશરથાત્મજમ્ ॥ ૧૪॥

કુન્દકુડ્મલદન્તાભં કુઙ્કુમાઙ્કિતવક્ષસમ્ ।
કુસુમ્ભવસ્ત્રસંવીતં પુત્રં રાઘવમાશ્રયે ॥ ૧૫॥

મલ્લિકામાલતીજાતિમાધવીપુષ્પશોભિતમ્ ।
મહનીયમહં વન્દે મહતાં કીર્તિવર્ધનમ્ ॥ ૧૬॥

ઇદં યો રાઘવસ્તોત્રં નરઃ પઠતિ ભક્તિમાન્ ।
મુક્તઃ સંસૃતિબન્ધાબ્ધિ સ યાતિ પરમં પદમ્ ॥ ૧૭॥

ઇતિ શ્રીરાઘવસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Raghava Stotram*

pdf was typeset on September 12, 2020

Please send corrections to *sanskrit@cheerful.com*